শ্রীঃ
শ্রীমতে রামানুজায নমঃ
শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রী ৱরদাচার্য দাসেন কৃতা

# ॥ শ্রী রঙ্গরামানুজস্তুতিঃ ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

*His Holiness śrīmad āṇḍavan śrīraṅgam*

শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

# ॥ শ্রী রঙ্গরামানুজস্তুতিঃ ॥

রঙ্গরামানুজযতিঃ জগদ্বিখ্যাত পণ্ডিতঃ।
সমর্পিতান্ নমস্কারান্ প্রতিগৃহ্ণাতু মামকান্॥ **1** ॥

রঙ্গরামানুজযতেঃ যঃ পুমান্ দৃষ্টিগোচরঃ।
স শ্লাঘ্যস্স গুণী ধন্যঃ স জ্ঞানীত্যুচ্যতে বুধৈঃ॥ **2** ॥

কর্ণাদযো হি দাতারঃ যাচিতৃভ্যো ধনং দদুঃ।
অযাচিতারোঽপি ধনং প্রাপ্নুৱন্তি যতীশ্ৱরাৎ॥ **3** ॥

অশক্যমিতি যৎকর্ম ত্যজ্যতেঽন্যৈর্মহাত্মভিঃ।
তদেৱ পূর্যতে শীঘ্রং ভৱদ্ভিঃ ৱিবুধোত্তমৈঃ॥ **4** ॥

সংপ্রদাযগ্রন্থলোপো ন ভৱেদিতি চিন্তযা।
মুদ্রীক্রিযন্তে সদগ্রন্থা ভৱদ্ভির্দেশিকোত্তমৈঃ॥ **5** ॥

স্ৱেচ্ছাং পূরযিতুং সর্ৱে মানৱাঃ কুর্ৱতে তপঃ।
তপসস্তপসা নূনং অৱতীর্ণো ন সংশযঃ॥ **6** ॥

রঙ্গরামানুজো যত্র তত্র সন্নিহিতো হরিঃ।
তৎস্থলং মথুরাঽযোধ্যা তৎস্থলং ভুক্তিমুক্তিদম্॥ **7** ॥

সিদ্ধান্তরক্ষণে দক্ষান্ পরৱাদিভযঙ্করান্।
ভৱচ্ছিষ্যান্ লক্ষ্মণার্যো ৱীক্ষ্য সংমোদতে ধ্রুৱম্॥ **8** ॥

ইমে শ্লোকাস্সমর্প্যন্তে ভৱচ্চরণযোর্মুদা।
ত্যাজ্যা দোষা গুণা গ্রাহ্যা যতিরাজ গুরূত্তম॥ 9॥

॥ ইতি শ্রী রঙ্গরামানুজস্তুতিঃ সমাপ্তা॥